# vishvanAthAShTakam

# વિશ્વનાથાષ્ટકમ્

## Document Information

Text title : Vishvanatha Ashtakam

File name : vishvanaatha8.itx

Category : aShTaka, shiva

Location : doc_shiva

Author : Traditional

Transliterated by : Subramanian Ganesh sgesh at hotmail.com

Proofread by : Subramanian Ganesh sgesh at hotmail.com

Latest update : October 14, 2000

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 1, 2022

*sanskritdocuments.org*

# વિશ્વનાથાષ્ટકમ્

ગઙ્ગાતરંગરમણીયજટાકલાપં
    ગૌરીનિરન્તરવિભૂષિતવામભાગમ્ ।
નારાયણપ્રિયમનંગમદાપહારં
    વારાણસીપુરપતિં ભજ વિશ્વનાથમ્ ॥ ૧॥

વાચામગોચરમનેકગુણસ્વરૂપં
    વાગીશવિષ્ણુસુરસેવિતપાદપીઠમ્ ।
વામેનવિગ્રહવરેણકલત્રવન્તં
    વારાણસીપુરપતિં ભજ વિશ્વનાથમ્ ॥ ૨॥

ભૂતાધિપં ભુજગભૂષણભૂષિતાંગં
    વ્યાઘ્રાજિનાંબરધરં જટિલં ત્રિનેત્રમ્ ।
પાશાંકુશાભયવરપ્રદશૂલપાણિં
    વારાણસીપુરપતિં ભજ વિશ્વનાથમ્ ॥ ૩॥

શીતાંશુશોભિતકિરીટવિરાજમાનં
    ભાલેક્ષણાનલવિશોષિતપંચબાણમ્ ।
નાગાધિપારચિતભાસુરકર્ણપૂરં
    વારાણસીપુરપતિં ભજ વિશ્વનાથમ્ ॥ ૪॥

પંચાનનં દુરિતમત્તમતઙ્ગજાનાં
    નાગાન્તકં દનુજપુંગવપન્નગાનામ્ ।
દાવાનલં મરણશોકજરાટવીનાં
    વારાણસીપુરપતિં ભજ વિશ્વનાથમ્ ॥ ૫॥

તેજોમયં સગુણનિર્ગુણમદ્વિતીયં
    આનન્દકન્દમપરાજિતમપ્રમેયમ્ ।
નાગાત્મકં સકલનિષ્કલમાત્મરૂપં
    વારાણસીપુરપતિં ભજ વિશ્વનાથમ્ ॥ ૬॥

રાગાદિદોષરહિતં સ્વજનાનુરાગં
 વૈરાગ્યશાન્તિનિલયં ગિરિજાસહાયમ્ ।
માધુર્યધૈર્યસુભગં ગરલાભિરામં
 વારાણસીપુરપતિં ભજ વિશ્વનાથમ્ ॥ ૭॥

આશાં વિહાય પરિહૃત્ય પરસ્ય નિન્દાં
 પાપે રતિં ચ સુનિવાર્ય મનઃ સમાધૌ ।
આદાય હૃત્કમલમધ્યગતં પરેશં
 વારાણસીપુરપતિં ભજ વિશ્વનાથમ્ ॥ ૮॥

વારાણસીપુરપતેઃ સ્તવનં શિવસ્ય
 વ્યાખ્યાતમષ્ટકમિદં પઠતે મનુષ્યઃ ।
વિદ્યાં શ્રિયં વિપુલસૌખ્યમનન્તકીર્તિં
 સમ્પ્રાપ્ય દેહવિલયે લભતે ચ મોક્ષમ્ ॥ ૯॥

વિશ્વનાથાષ્ટકમિદં યઃ પઠેચ્છિવસન્નિધૌ ।
શિવલોકમવાપ્નોતિ શિવેન સહ મોદતે ॥

॥ ઇતિ શ્રીમહર્ષિવ્યાસપ્રણીતં શ્રીવિશ્વનાથાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded by Subramanian Ganesh sgesh@hotmail.com

*vishvanAthAShTakam*

pdf was typeset on January 1, 2022

Please send corrections to *sanskrit@cheerful.com*